# *श्री तुलसी स्तोत्रम्*

जगद्धात्री नमस्तुभ्यं विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः सृष्टिस्थिति अंतकारिणः ॥ 1 ॥

नमः तुलसी कल्याणी नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः सम्पत् प्रदायिके ॥ 2 ॥

तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ 3 ॥

नमामि शिरसा देवीं तुलसीं वलसत् तनुम् ।
यां दृष्ट्वा पापिनो मर्त्या मुच्यंते सव्र किल्बिषात् ॥ 4 ॥

तुलस्या रक्षितां सर्वं जगद् एतत् चराचरम् ।
या विनिर्हन्ति पापानि दृष्टा वै पापिभिर् नरैः ॥ 5 ॥

नमः तुलसे अतितरां तस्यै बद्धांजलिं कलौ ।
कलयंति सुखं सर्वे स्त्रियो वैश्यास्तथापरे ॥ 6 ॥

तुलस्या नापरं किंचिद् दैवतं जगती तले ।
यया पवित्रितो लोको विष्णु संगेन वैष्णवः ॥ 7 ॥

तुलस्याः पल्लवां विष्णोः शिरस्यारोपितं कलौ ।
आरोपयति सर्वाणि श्रेयांसि वर मस्तके ॥ 8 ॥

तुलस्यां सकला देवा वसंति सततं यतः ।
अतः तां अर्चयेल्लोके सर्वान् देवान् समर्चयन् ॥ 9 ॥

नमः तुलसी सर्वज्ञे पुरुषोत्तम वल्लभे ।
पाहि मां सर्व पापेभ्यो सर्वसंपत् प्रदायिके ॥ 10 ॥
इति स्तोत्रं पुरा गीतं पुण्डरीकेण धीमता ।
विष्णुं अर्चयता नित्यं शोभनैः तुलसी दलैः ॥ 11 ॥

तुलसी श्रीः महालक्ष्मीः विद्याविद्या यशस्विनि ।
धर्म्या धर्मानना वृंदा देवदेवमनः प्रिया ॥ 12 ॥

लक्ष्मी प्रिय सखी देवी द्यौः भूमिर् अचला चला ।
षोडशैतानि नामानि तुलस्याः कीर्तयेन् नरः ॥ 13 ॥

लभते सुतरां भक्तमन्ते विष्णुपदं तथा ।
तुलसी भूः महालक्ष्मीः पद्मिनी श्रीहरिप्रिया ॥ 14 ॥

तुलसी श्री सखी शुभे पापहारिणी पुण्यदे ।
नमः ते नारदनुते नारायण मनः प्रिये ॥ 15 ॥

॥ इति श्री पुण्डरीक कृतं श्री तुलसी स्तोत्रं संपूर्णम् ॥